# bRihatpArAsharahorAshAstramh 31-40

# બૃહત્પારાશરહોરાશાસ્ત્રમ્ ૩૧-૪૦

## Document Information

Text title : bRihatpArAsharahorAshAstram.h 31-40

File name : par3140.itx

Category : jyotisha, sociology_astrology, bRihatpArAshara

Location : doc_z_misc_sociology_astrology

Transliterated by : Ahto Jarve ajarve at fms30.cca.rockwell.com

Proofread by : Ahto Jarve ajarve at fms30.cca.rockwell.com

Latest update : November 1, 2010

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 14, 2022

*sanskritdocuments.org*

# bRihatpArAsharahorAshAstramh 31-40

# બૃહત્પારાશરહોરાશાસ્ત્રમ્ ૩૧-૪૦

અથાઽર્ગલાધ્યાયઃ ॥ ૩૧॥

ભગવાન્ યાઽર્ગલા પ્રોક્તા શુભદા ભવતાઽધુના ।
તામહં શ્રોતુમિચ્છામિ સલક્ષણફલં મુને ॥ ૧॥

મૈત્રેય સાર્ગલા નામ યયા ભાવફલં દૃઢમ્ ।
સ્થિરં ખેટફલં ચ સ્યાત્ સાઽધુના કથ્યતે મયા ॥ ૨॥

ચતુર્થે ચ ધને લાભે ગ્રહે જ્ઞેયા તદર્ગલા ।
તદ્બાધકાઃ ક્રમાત્ ખેટા વ્યોમરિષ્ફતૃતીયગાઃ ॥ ૩॥

નિર્બલા ન્યૂનસંખ્યા વા બાધકા નૈવ સમ્મતાઃ ।
તૃતીયે વ્યાધિકાઃ પાપા યત્ર મૈત્રેય બાધકાઃ ॥ ૪॥

તત્રાપિ ચાર્ગલા જ્ઞેયા વિપરીતા દ્વિજોત્તમ ।
તથાપિ ખેટભાવાનાં ફલમર્ગલિતં વિદુઃ ॥ ૫॥

પઞ્ચમં ચાર્ગલાસ્થાનં નવમં તદ્વિરોધકૃત્ ।
તમોગ્રહભવા સા ચ વ્યત્યયાજ્ જ્ઞાયતે દ્વિજ ॥ ૬॥

એકગ્રહા કનિષ્ઠા સા દ્વિગ્રહા મધ્યમા સ્મૃતા ।
અર્ગલા દ્વ્યધિકોત્પન્ના મુનિભિઃ કથિતોત્તમા ॥ ૭॥

રાશિતો ગ્રહતશ્ચાપિ વિજ્ઞેયા દ્વિવિધાઽર્ગલા ।
નિર્બાધકા સુફલદા વિફલા ચ સબાધકા ॥ ૮॥

યત્ર રાશૌ સ્થિતઃ ખેટસ્તસ્ય પાકાન્તરં યદા ।
તસ્મિન્ કાલે ફલં જ્ઞેયં નિર્વિશંકં દ્વિજોત્તમ ॥ ૯॥

અર્ગલાં પ્રતિબન્ધઞ્ચ કથમાંઘ્રિચતુર્થયોઃ ।
દ્વિત્ર્યઙ્ઘ્રયોશ્ચ મિથો વિપ્ર ચિન્તયેદિતિ મે મતમ્ ॥ ૧૦॥

પદે લગ્ને મદે વાપિ નિરાભાસાર્ગલા યદા ।
તદા જાતોઽતિવિખ્યાતો બહુભાગ્યયુતો ભવેત્ ॥ ૧૧॥

યસ્ય પાપઃ શુભો વાપિ ગ્રહસ્તિષ્ઠેત્ શુભાર્ગલે ।
તેન દ્રષ્ટેક્ષિતં લગ્નં પ્રાબલ્યાયોપકલ્પ્યતે ॥ ૧૨॥

સાર્ગલે ચ ધને વિપ્ર ધનધાન્યસમન્વિતઃ ।
તૃતીયે સોદરાદીનાં સુખમુક્તં મનીષિભિઃ ॥ ૧૩॥

ચતુર્થે સાર્ગલે ગેહપશુબન્ધુકુલૈર્યુતઃ ।
પઞ્ચમે પુત્રપૌત્રાદિસંયુતો બુદ્ધિમાન્નરઃ ॥ ૧૪॥

ષષ્ઠે રિપુભયં કામે ધનદારસુખં બહુ ।
અષ્ટમે જાયતે કષ્ટં ધર્મે ભાગ્યોદયો ભવેત્ ॥ ૧૫॥

દશમે રાજસમ્માનં લાભે લાભસમન્વિતઃ ।
સાર્ગલે ચ વ્યયે વિપ્ર વ્યયાધિક્યં પ્રજાયતે ॥ ૧૬॥

શુભગ્રહાર્ગલાયાં તુ સૌખ્યં બહુવિધં ભવેત્ ।
મધ્યં પાપાર્ગલાયાં ચ મિશ્રાયામપિ ચોત્તમમ્ ॥ ૧૭॥

લગ્નપઞ્ચમભાગ્યેષુ સાર્ગલેષુ દ્વિજોત્તમ ।
જાતશ્ચ જાયતે રાજા ભાગ્યવાન્ નાત્ર સંશયઃ ॥ ૧૮॥

## અથ કારકાધ્યાયઃ ॥ ૩૨॥

અથાઽહં સમ્પ્રવક્ષ્યામિ ગ્રહાનાત્માદિકારકાન્ ।
સપ્તરવ્યાદિશન્યન્તાન્ રાહ્વન્તાન્ વાઽષ્ટસંખ્યકાન્ ॥ ૧॥

અંશૈઃ સમૌગ્રહૌ દ્વૌ ચેદ્રાહ્વન્તન્ ચિન્તયેત્ તદા ।
સપ્તૈવ કારકાનેવં કેચિદષ્ટૌ પ્રચક્ષતે ॥ ૨॥

અત્મા સૂર્યાદિખેટાનાં મધ્યે હ્યંશાધિકો ગ્રહઃ ।
અંશસામ્યે કલાધિક્યાત્ તત્સામ્યે વિકલાધિકઃ ॥ ૩॥

બુધૌ રાશિકલાધિક્યત્ ગ્રાહ્યો નૈવાત્મકારકઃ ।
અંશાધિકઃ કારકઃ સ્યાદલ્પભાગોઽન્ત્યકારકઃ ॥ ૪॥

મધ્યાંશો મધ્યખેટઃ સ્યાદુપખેટઃ સ એવ હિ ।
વિલોમગમનાદ્રાહોરંશાઃ શોધ્યાઃ ખવહ્નિતઃ ॥ ૫॥

અંશક્રમાદધોઽધઃસ્થાશ્ચરાખ્યાઃ કારકા ઇતિ ।
આત્માખ્યકારકસ્તેષુ પ્રધાનં કથ્યતે દ્વિજ ॥ ૬॥

સ એવ જાતકાધીશો વિજ્ઞેયો દ્વિજસત્તમ ।
યથા ભૂમૌ પ્રસિદ્ધોઽસ્તિ નરાણાં ક્ષિતિપાલકઃ ॥ ૭॥

સર્વવાર્તાધિકારી ચ બન્ધકૃન્મોક્ષકૃત્ તથા ॥ ૮॥

યથા રાજાજ્ઞયા વિપ્રા પુત્રામાત્યાદયો જનાઃ ।
સમર્થા લોકકાર્યેષુ તથૈવાન્યેપિ કારકાઃ ॥ ૯॥

આત્માનુકૂલમેવાત્ર ભવન્તિ ફલદાયકઃ ।
પ્રતિકૂલે યથા ભૂપે સર્વેઽમાત્યાદયો દ્વિજ ॥ ૧૦॥

કર્ય કર્તું મનુષ્યાનાં ન સમર્થા ભવન્તિ હિ ।
તથાઽત્મકારકે ક્રૂરે નાઽન્યે સ્વશુભદાયકઃ ॥ ૧૧॥

અનુકૂલે નૃપે યદ્વત્ સર્વેઽમાત્યાદયો દ્વિજ ।
નાશુભં કુર્વતે તદ્વનાન્યે સ્વાશુભદાયકાઃ ॥ ૧૨॥

આત્માકારકભાગેભ્યો ન્યૂનાંશોઽમાત્યકારકઃ ।
તસ્માન્ન્યૂનાંશકો ભ્રાતા તન્ન્યૂનોમાતૃસંજ્ઞકઃ ॥ ૧૩॥

તન્ન્યૂનાંશઃ પિતાતસ્માદલ્પાંશઃ પુત્રકારકઃ ।
પુત્રાન્ન્યૂનાંશકો જ્ઞાતિર્જ્ઞાતેર્ન્યૂનાંશકો હિ યઃ ॥ ૧૪॥

સ દારકારકો જ્ઞેયો નિર્વિશંકે દ્વિજોત્તમ ।
ચરાખ્યકારલા એતે બ્રાહ્મણા કથિતાઃ પુરા ॥ ૧૫॥

માતૃકારકમેવાઽન્યે વદન્તિ સુતકારકમ્ ।
દ્વૌ ગ્રહૌ ભાગતુલ્યૌ ચેજ્જાયેતાં યસ્ય જન્મનિ ॥ ૧૬॥

તદગ્રકારકસ્યૈવં લોપો જ્ઞેયો દ્વિજોત્તમ ।
સ્થિરકારકવશાત્તસ્ય ફલં જ્ઞેયં શુભાઽશુભમ્ ॥ ૧૭॥

અધુના સમ્પ્રવક્ષ્યામિ સ્થિરાખ્યાન્ કરકગ્રહાન્ ।
સ પિતૃકારકો જ્ઞેયો યો બલી રવિશુક્રયોઃ ॥ ૧૮॥

ચન્દ્રારયોર્બલી ખેટો માતૃકારક ઉચ્યતે ।
ભૌમતો ભગિની શ્યાલઃ કનીયાન્ જનનીત્યપિ ॥ ૧૯॥

બુધાન્માતૃસજાતીયા માતુલાદ્યાશ્ચ બાન્ધવાઃ ।
ગુરોઃ પિતામહઃ શુક્રાત્ પિતઃ પુત્રઃ શનૈશ્ચરાત્ ॥ ૨૦॥

વિપ્રાન્તેવાસિનઃ પત્ની પિતરૌ શ્વશુરૌ તથા ।
માતામહાદયશ્ચિન્ત્યા એતે ચ સ્થિરકારકા ॥ ૨૧॥

અથાઽહં કારકાન્ વક્ષ્યે ખેટભાવવશાદ્વિજ ।
રવિતઃ પુન્>યભે તાતશ્ચન્દ્રાન્માતા ચતુર્થકે ॥ ૨૨॥

કુજાત્ તૃતીયતો ભ્રાતા બુધાત્ ષષ્થે ચ માતુલઃ ।
દેવેજ્યાત્ પઞ્ચમાત્ પુત્રો દારાઃ શુક્રાચ્ચ સપ્તમે ॥ ૨૩॥

મન્દાદષ્ટમતો મૃત્યુઃ પિત્રાદીનાં વિચિન્તયેત્ ।
ઇતિ સર્વં વિચાર્યૈવ બુધસ્તત્તત્ ફલં વદેત્ ॥ ૨૪॥

અથાઽહં સમ્પ્રવક્ષ્યામિ પ્રસઙ્ગાદ્યોગકારકાન્ ।
ખેટાન્ જન્મનિ જાતસ્ય મિશ્રઃ સ્થિતિવશાદ્ દ્વિજ ॥ ૨૫॥

સ્વર્ક્ષે સ્વોચ્ચે ચ મિત્રર્ક્ષે મિથઃ કેન્દ્રગતા ગ્રહાઃ ।
તે સર્વે કારકાસ્તેષુ કર્મગસ્તુ વિશેષતઃ ॥ ૨૬॥

યથા લગ્ને સુખે કામે સ્વોર્ક્ષોચ્ચસ્થા ગ્રહા દ્વિજ ।
ભવન્તિ કારકાખ્યાસ્તે વિશેષેણ ચ ખે સ્થિતાઃ ॥ ૨૭॥

સ્વમિત્રોચ્ચર્ક્ષગો હેતુરન્યોઽન્યં યદિ કેન્દ્રગઃ ।
સુહૃત્ તદ્ગુણસમ્પન્નઃ સોઽપિ કારક ઉચ્યતે ॥ ૨૮॥

નીચાન્વયેઽપિ યો જાતઃ વિદ્યમાને ચ કારકે ।
સોઽપિ રાજમનો વિપ્ર ધનવાન્ સુખસંયુતઃ ॥ ૨૯॥

રાજવંશસમુત્પન્નો રાજા ભવતિ નિશ્ચયાત્ ।
એવં કુલાનુસારેણ કારકેભ્યઃ ફલં વદેત્ ॥ ૩૦॥

અથાઽહં સમ્પ્રવક્ષ્યામિ વિશેષં ભાવકારકાન્ ।
જનસ્ય જન્મલગ્નં યત્ વિન્દ્યાદાત્મકારકમ્ ॥ ૩૧॥

ધનભાવં વિજાનીયાદ્ દારકારકમેવ હિ ।
એકાદશેઽગ્રજાતસ્ય તૃતીયે તુ કનીયસઃ ॥ ૩૨॥

સુતે સુતં વિજાનીયાત્ પત્નીં સપ્તમભાવતઃ ।

સુતભવે ગ્રહો યઃ સ્યાત્ સોऽપિ કારક ઉચ્યતે ॥ ૩૩॥

સૂર્યો ગુરુઃ કુજઃ સોમો ગુરુર્ભૌમઃ સિતઃ શનિઃ ।
ગુરુશ્ચન્દ્રસુતો જીવો મન્દશ્ચ ભવકારકાઃ ॥ ૩૪॥

પુનસ્તન્વાદયો ભાવઃ સ્થાપ્યાસ્તેષાં શુભાऽશુભમ્ ।
લાભસ્તૃતીયો રન્ધ્રશ્ચ શત્રુસંજ્ઞધનવ્યયાઃ ॥ ૩૫॥

એતે ભાવાઃ સમાખ્યાતાઃ ક્રૂરાખ્યા દ્વિજસત્તમ ।
એષાં યોગેન યો ભાવસ્તસ્ય હાનિઃ પ્રજાયતે ॥ ૩૬॥

ભાવા ભદ્રાશ્ચ કેન્દ્રારવ્યાઃ કોણાખ્યૌ દ્વિજસત્તમ ।
એષાં સંયોગમાત્રેણ હ્યશુભોऽપિ શુભો ભવેત્ ॥ ૩૭॥

---

## અથ કારકાંશફલાધ્યાયઃ ॥ ૩૩॥

અથાऽહં સમ્પ્રવક્ષ્યામિ કારકાંશફલં દ્વિજ ।
મેષાદિરાશિગે સ્વાંશે યથાવદ્ બ્રહ્મભાષિતમ્ ॥ ૧॥

ગૃહે મૂષકમાર્જારા મેષાંશે હ્યાત્મકારકે ।
સદા ભયપ્રદા વિપ્ર પાપયુક્તે વિશેષતઃ ॥ ૨॥

વૃષાંશકગતે સ્વસ્મિન્ સુખદાશ્ચ ચતુષ્પદાઃ ।
મિથુનાંશગતે તસ્મિન્ કણ્ડ્વાદિવ્યાધિસમ્ભવઃ ॥ ૩॥

કર્કાંશે ચ જલાદ્ભીતિઃ સિમ્હાંશે શ્વપદાદ્ભયમ્ ।
કણ્ડૂઃ સ્થૌલ્યઞ્ચ કન્યાંશે તથા વહ્નિકણાદ્ભયમ્ ॥ ૪॥

તુલાંશે ચ વણિગ્ જાતો વસ્ત્રાદિનિર્મિતૌ પટુઃ ।
અલ્યંશે સર્પતો ભીતિઃ પીડા માતુઃ પયોધરે ॥ ૫॥

ધનુરંશે ક્રમાદુચ્ચાત્ પતનં વાહનાદપિ ।
મરકાંશે જલોદ્ભૂતૈર્જન્તુભિઃ ખેચરસ્તથા ॥ ૬॥

શંખમુક્તાપ્રવાલાદ્યૈર્લાભો ભવતિ નિશ્ચિતઃ ।
કુમ્ભાંશે ચ તડાગાદિકારકો જાયતે જનઃ ॥ ૭॥

મીનાંશે કારકે જાતો મુક્તિભાગ્ દ્વિજસત્તમ ।
નાऽશુભં શુભસંદૃષ્ટે ન શુભં પાપવીક્ષિતે ॥ ૮॥

કારકાંશે શુભે વિપ્ર લગ્નાંશે ચ શુભગ્રહે ।
શુભસંવીક્ષિતે જાતો રાજા ભવતિ નિશ્ચિતઃ ॥ ૯॥

સ્વાંશાચ્છુભગ્રહાઃ કેન્દ્રે કોણે વા પાપવર્જિતાઃ ।
ધનવિદ્યાયુતો જાતો મિશ્રૈર્મિશ્રફલં વદેદ્ ॥ ૧૦॥

ઉપગ્રહે ચ વિપ્રેન્દ્ર સ્વોચ્ચસ્વર્ક્ષસુભર્ક્ષગે ।
પાપદૃગ્રહિતે ચાઽન્ત્યે કૈવલ્યંતસ્ય નિર્દિશેત્ ॥ ૧૧॥

ચન્દ્રાઽરભૃગુવર્ગસ્થ કારકે પારદારિકઃ ।
વિપર્યસ્થેઽન્યથા જ્ઞેયં ફલં સર્વં વિચક્ષણૈઃ ॥ ૧૨॥

કારકાંશે રવૌ જાતો રાજકાર્યપરો દ્વિજ ।
પૂર્ણેન્દ્રૌ ભોગવાન્ વિદ્વાન્ શુક્રદૃષ્ટે વિશેષતઃ ॥ ૧૩॥

સ્વાંશે બલયુતે ભૌમે જાતઃ કન્તાયુધી ભવેત્ ।
વહ્નિજીવી નરો વાઽપિ રસવાદી ચ જાયતે ॥ ૧૪॥

બુધે બલયુતે સ્વાંશે કલાશિલ્પવિચક્ષનઃ ।
વાણિજ્યકુશલશ્ચાપિ બુદ્ધિવિદ્યાસમન્વિતઃ ॥ ૧૫॥

સુકર્મા જ્ઞાનનિષ્ઠશ્ચ વેદવિત્ સ્વાંશગે ગુરૌ ।
શુક્રે શતેન્દ્રિયઃ કામી રાજકીતો ભવેન્નરઃ ॥ ૧૬॥

શનૌ સ્વાંશગતે જાતઃ સ્વકુલોચિતકર્મકૃત્ ।
રાહૌ ચૌરશ્ચ ધનુષ્કો જાતો વા લોહયન્ત્રકૃત્ ॥ ૧૭॥

વિષવૈદ્યોઽથવા વિપ્ર જાયતે નાઽત્ર સંશયઃ ।
વ્યયહારી ગજાદીનાં કેતૌ ચૌરશ્ચ જાયતે ॥ ૧૮॥

રવિરાહૂ યદા સ્વાંશે સર્પાદ્ ભીતિઃ પ્રજાયતે ।
શુભદૃષ્ટૌ ભયં નૈવ પાપદૃષ્ટૌ મૃતિભવેત્ ॥ ૧૯॥

શુભષડ્વર્ગસંયુક્તૌ વિષવૈદ્યો ભવેન્ તદા ।
ભૌમેક્ષિતે કારકાંશે ભાનુસ્વર્ભાનુસંયુતે ॥ ૨૦॥

અન્યગ્રહા ન પશ્યન્તિ સ્વવેશ્મપરદાહકઃ ।
તસ્મિન્ બુધેક્ષિ તે ચાપિ વહ્નિદો નૈવ જાયતે ॥ ૨૧॥

પાપર્ક્ષે ગુરુણા દૃષ્ટે સમીપગૃહદાહકઃ ।
શુક્રદૃષ્ટે તુ વિપ્રેન્દ્ર ગૃહદાહો ન જાયતે ॥ ૨૨॥

ગુલિકેન યુતે સ્વાંશે પૂર્ણચન્દ્રેણ વીક્ષિતે ।
ચૌરૈર્હૃતધનો જાતઃ સ્વયં ચૌરોઽથવા ભવેત્ ॥ ૨૩॥

ગૃહાદૃષ્ટે સગુલિકે વિપદો વા વિષૈર્હતઃ ।
બુધદૃષ્ટે બૃહદ્બીજો જાયતે નાઽત્ર સંશયઃ ॥ ૨૪॥

સકેતૌ કારકાંશે ચ પાપદૃષ્ટે દ્વિજોત્તમ ।
જાતસ્ય કર્ણરોગો વા કર્ણચ્છેદઃ પ્રજાયતે ॥ ૨૫॥

ભૃગુપુત્રેક્ષિતે તસ્મિન્ દીક્ષિતો જાયતે જનઃ ।
બુધાર્કિદૃષ્ટે નિર્વીર્યો જાયતે માનવો ધ્રુવમ્ ॥ ૨૬॥

બુધશુક્રેક્ષિતે તસ્મિન્ દાસીપુત્રઃ પ્રજાયતે ।
પુનર્ભવાસુતો વાઽપિ જાયતે નાઽત્ર સંશયઃ ॥ ૨૭॥

તપસ્વી સનિના દૃષ્ટે જાતઃ પ્રેષ્યોઽથવા ભવેત્ ।
શનિમાત્રેક્ષિતે તસ્મિન્ જાતઃ સંન્યાસિવેષવાન્ ॥ ૨૮॥

રવિસુક્રેક્ષિતે તસ્મિન્ રાજપ્રેષ્યો જનો ભવેત્ ।
ઇતિસંક્ષેપતઃ પ્રોક્તં કારકાંશફલં દ્વિજ ॥ ૨૯॥

સ્વાંશાદ્ધને ચ શુક્રારવર્ગે સ્યાત્ પારદારિકઃ ।
તયોર્દૃગ્યોગતો જ્ઞેયમિદમામરણં ફલમ્ ॥ ૩૦॥

કેતૌ તત્પ્રતિબન્ધઃ સ્યાત્ ગુરૌ તુ સ્રૈણ એવ સઃ ।
રાહૌ ચાઽર્થનિવૃત્તિઃ સ્યાત્ કારકાંશાદ્ દ્વિતીયગે ॥ ૩૧॥

સ્વાંશાત્ તૃતીયગે પાપે જાતઃ શૂરઃ પ્રતાપવાન્ ।
તસ્મિન્ શુભગ્રહે જાતઃ કાતરો નાત્ર સંશયઃ ॥ ૩૨॥

સ્વાંશાચ્ચતુર્થભાવે તુ ચન્દ્રશુક્રયુતેક્ષિતે ।
તત્ર વા સ્વોચ્ચગે ખેટે જાતઃ પ્રાસાદવાન્ ભવેત્ ॥ ૩૩॥

શનિરાહુયુતે તસ્મૈન્ જાતસ્ય ચ શિલાગૃહમ્ ।
ઐષ્ટિકં કુજકેતુભ્યાં ગુરુણા દારવં ગૃહમ્ ॥ ૩૪॥

તાર્ણ તુ રવિણા પ્રોક્તં જાતસ્ય ભવનં દ્વિજ ।
ચન્દ્રે ત્વનાવૃતે દેશે પત્નીયૂગઃ પ્રજાયતે ॥ ૩૫॥

પઞ્ચમે કુજરાહુભ્યાં ક્ષયરોગસ્ય સંભવઃ ।

રાત્રિનાથેન દૃષ્ટાભ્યાં નિશ્ચયેન પ્રજાયતે ॥ ૩૬॥

કુજદૃષ્ટૌ તુ જાતસ્ય પિટકાદિગદો ભવેત્ ।
કેતુદૃષ્ટૌ તુ ગ્રહણી જલરોગોઽથવા દ્વિજ ॥ ૩૭॥

સરાહુગુલિકે તત્ર ભયં ક્ષુદવિષોદ્ભવમ્ ।
બુધે પરમહંસશ્ચ લગુડી વા પ્રજાયતે ॥ ૩૮॥

રવૌ ખેડ્ગધરો જાતઃ કુજે કુન્તાયુધી ભવેત્ ।
શનૌ ધનુર્ધરો જ્ઞેયો રાહૌ ચ લોહયન્ત્રવાન્ ॥ ૩૯॥

કેતૌ ચ ઘટિકાયન્ત્રી માનવો જાયતે દ્વિજ ।
ભાર્ગવે તુ કવિર્વાગ્મી કાવ્યજ્ઞો જાયતે જનઃ ॥ ૪૦॥

સ્વાંશે તત્પઞ્ચમે વાઽપિ ચન્દ્રેજ્યાભ્યાં ચ ગ્રન્થકૃત્ ।
શુક્રેણ કિઞ્ચિદૂનોઽસૌ તતોઽપ્યલ્પો બુધેન ચ ॥ ૪૧॥

ગુરુણા કેવલેનૈવ સર્વવિદ્ ગ્રન્થકૃત્ તથા ।
વેદવેદાન્તવિચ્ચાપિ ન વાગ્મી શાબ્દકોઽપિ સન્ ॥ ૪૨॥

નૈયાયિકઃ કુજેનાસૌ જ્ઞેન મીમાંસકસ્તથા ।
સભાજડસ્તુ શનિના ગીતજ્ઞો રવિણા સ્મૃતઃ ॥ ૪૩॥

ચન્દ્રેણ સાંખ્યયોગજ્ઞઃ સાહિત્યજ્ઞશ્ચ ગાયકઃ ।
કેતુના ગણિતજ્ઞોઽસૌ રાહણાઽપિ તથૈવ ચ ॥ ૪૪॥

સપ્રદાયસ્ય સિધ્હિઃ સ્યાત્ ગુરુસમ્બન્ધતો દ્વિજ ।
સ્વાંશાદ્ દ્વિતીયતઃ કેચિત્ ફલમેવં વદન્તિ હિ ॥ ૪૫॥

સ્વાંશાત્ ષષ્ઠગતે પાપે કર્ષકો જાયતે જનઃ ।
શુભગ્રહેઽલસશ્ચેતિ તૃતીયેઽપિ ફલં સ્મૃતમ્ ॥ ૪૬॥

ધૂને ચન્દ્રગુરુ યસ્ય ભાર્યા તસ્યાતિસુન્દરી ।
તત્ર કામવતી શુક્રે બુધે ચૈવ કલાવતી ॥ ૪૭॥

રવૌ ચ સ્વકુલે ગુપ્તા શનૌ ચાપિ વયોઽધિકા ।
તપસ્વિની રુજાઢ્ય વા રાહૌ ચ વિધવા સ્મૃતા ॥ ૪૮॥

શુભસ્વામિયુતે રન્ધ્રે સ્વાંશાદ્ દીર્ઘાયુરુચ્યતે ।
પાપેક્ષિતયુતેઽલ્પાયુર્મધ્યાયુર્મિશ્રદૃગ્યુતે ॥ ૪૯॥

કારકાંશાચ્ચ નવમે શુભગ્રહયુતેક્ષિત ।
સત્યવાદી ગુરૌ ભક્તઃ સ્વધર્મનિરતો નરઃ ॥ ૫૦॥

સ્વાંશાચ્ચ નવમે ભાવે પાપગ્રહયુતેક્ષિતે ।
સ્વધર્મનિરતો બાલ્યે મિથ્યાવાદી ચ વાર્ધકે ॥ ૫૧॥

નવમે કારકાંશાચ્ચ શનિરાહુયુતેક્ષિતે ।
ગુરુદ્રોહી ભવેદ્ બાલઃ શાસ્ત્રેષુ વિમુખો નરઃ ॥ ૫૨॥

કારકાંશાચ્ચ નવમે ગુરુભાનુયુતેક્ષિતે ।
તદાઽપિ ગુરુદ્રોહી સ્યાત્ ગુરુવાક્યં ન મન્યતે ॥ ૫૩॥

કારકાંશાચ્ચ નવમે શુક્રભૌમયુતેક્ષિતે ।
ષડ્વર્ગાદિકયોગે તુ મરણં પારદારિકમ્ ॥ ૫૪॥

કારકાંશાચ્ચ નવમે જ્ઞેન્દુયુક્તેક્ષિતે દ્વિજ ।
પરસ્ત્રી સઙ્ગમાદ્ બાલો બન્ધકો ભવતિ ધ્રુવમ્ ॥ ૫૫॥

નવમે કેવલેનૈવે ગુરુણા ચ યુતેક્ષિતે ।
સ્ત્રીલોતુપો ભવેજ્જાતો વિષયી ચૈવ જાયતે ॥ ૫૬॥

કારકાંશાચ્ચ દશમે શુભલ્હેટયુતેક્ષિતે ।
સ્થિરવિત્તો ભવેદ્ બાલો ગમ્ભીરો બલબુદ્ધિમાન્ ॥ ૫૭॥

દશમે કારકાંશાચ્ચ પાપખેટયુતેક્ષિતે ।
વ્યાપારે જાયતે હાનિઃ પિતૃસૌખ્યેન વર્જિતઃ ॥ ૫૮॥

દશમે કારકાંશાચ્ચ બુધશુક્રયુતેક્ષિતે ।
વ્યાપારે બહુલાભશ્ચ મહત્કર્મકઓર્ નરઃ ॥ ૫૯॥

કારકાંશાચ્ચ દશમે રવિચન્દ્રયુતેક્ષિતે ।
ગુરુદૃષ્ટયુતે વિપ્ર જાતકો રાજ્યભાગ્ ભવેત્ ॥ ૬૦॥

સ્વાંશાદેકાદશે સ્થાને શુભખેટયુતેક્ષિતે ।
ભ્રાતૃસૌખ્યયુતો બાલઃ સર્વકાર્યેષુ લાભકૃત્ ॥ ૬૧॥

એકાદશે સપાપે તુ કુમાર્ગાલ્લાબકૃન્નરઃ ।
વિખ્યાતો વિક્રમી ચૈવ જાયતે નાઽત્ર સંશયઃ ॥ ૬૨॥

કારકાંશાદ્ વ્યયસ્થાને સદ્ગ્રહે સદ્વ્યયો ભવેત્ ।
અસદ્વ્યયોઽશુભે જ્ઞાયો ગ્રહાભાવે ચ સત્ફલમ્ ॥ ૬૩॥

કારકાંશાદ્ વ્યયસ્થાને સ્વભોચ્ચસ્થે શુભગ્રહે ।
સદ્ગતિર્જાયતે તસ્ય શુભલોકમવાપ્નુયાત્ ॥ ૬૪॥

કારકાંશાદ્ વ્યયે કેતૌ શુભખેટયુતેક્ષિતે ।
તદા તુ જાયતે મુક્તિઃ સાયુજ્યપદમાપ્નુયાત્ ॥ ૬૫॥

મેષે ધનુષિ વા કેતૌ કારકાંશાત્ વ્યયે સ્થિતે ।
શુભખેટેન સન્દૃષ્ટે સાયુજપદમાપ્નુયાત્ ॥ ૬૬॥

વ્યયે ચ કેવલે કેતૌ પાપયુક્તેક્ષિતેપિ વા ।
ન તદા જાયતે મુક્તિઃ શુભલોકં ન પશ્યતિ ॥ ૬૭॥

રવિણા સંયુતે કેતૌ કારકાંશાદ્ વ્યયસ્થિતે ।
શિવભક્તિર્ભવેસ્યત્ત નિર્વિશંકં દ્વિજોત્તમ ॥ ૬૮॥

ચન્દ્રેણ સંયુતે કેતૌ કારકાંશાદ્ વ્યયસ્થિતે ।
ગૌર્યાં ભક્તિર્ભવેત્તસ્ય શાક્તિકો જાયતે નરઃ ॥ ૬૯॥

શુક્રેણ સંયુતે કેતૌ કારકાંશાદ્ વ્યયસ્થિતે ।
લક્ષ્મ્યાં સઞ્જાયતે ભક્તિર્જાતકો સૌ સમૃદ્ધિમાન્ ॥ ૭૦॥

કુજેન સંયુતે કેતૌ સ્કન્દભક્તૌ ભવેન્નરઃ ।
વૈષ્ણવો બુધસૌરિભ્યાં ગુરુણા શિવભક્તિમાન્ ॥ ૭૧॥

રાહુણા તામસીં દુર્ગાં સેવતે ક્ષુદ્રદેવતામ્ ।
ભક્તિઃ સ્કન્દેઽથ હેરમ્ભે શિખિના કેવલેન વા ॥ ૭૨॥

કારકાંશાદ્ વ્યયે સૌરિઃ પાપરાશૌ યદા ભવેત્ ।
તદાઽપિ ક્ષુદ્રદેવસ્ય ભક્તિસ્તસ્ય ન સંશયઃ ॥ ૭૩॥

પાપર્ક્ષેઽપિ શનૌ સુક્રે તદાઽપિ ક્ષુદ્રસેવકઃ ।
અમાત્યકારકાત્ ષષ્ઠેમેવમેવ ફલં વદેત્ ॥ ૭૪॥

કારકાંશાત્ ત્રિકોણસ્થે પાપખેતદ્વયે દ્વિજ ।
માનવો મન્ત્રતન્ત્રજ્ઞો જાયતે નાઽત્ર સંશયઃ ॥ ૭૫॥

પાપેન વીક્ષિતે તત્ર જાતો નિગ્રાહકો ભવેત્ ।
શુભૈર્નિરીક્ષિતે તસ્મિન્ નરોઽનુગ્રાહકો ભવેત્ ॥ ૭૬॥

શુક્રદૃષ્ટે વિધૌ સ્વાંશે રસવાદી ભવેન્નરઃ ।

બુધદૃષ્ટે ચ સદ્વૈદ્યઃ સર્વરોગહરો ભવેત્ ॥ ૭૭॥

શુક્રદૃષ્ટે સુખે ચન્દ્રે પાણ્ડુશ્વિત્રી ભવેન્નરઃ ।
ભૌમદૃષ્ટે મહારોગી રક્તપિત્તાર્દિતો ભવેત્ ॥ ૭૮॥

કેતુદૃષ્ટે સુખે ચંદ્રે નીલકુષ્ઠી પ્રજાયતે ।
ચતુર્થે પઞ્ચમેવાઽહિ સ્થિતૌ રાહુકુજૌ યદિ ॥ ૭૯॥

ક્ષયરોગો ભવેત્ તસ્ય ચન્દ્રદૃષ્ટૌ તુ નિશ્ચિતઃ ।
સ્વાંશાત્ સુખે સુતે વાઽપિ કેવલઃ સંસ્થિતઃ કુજઃ ॥ ૮૦॥

પિટ્કાદિર્ભવેત્ તસ્ય તદા રોગો ન સંશયઃ ।
ગ્રહણી જલરોગો વા તત્ર કેતૌ સ્થિતે સતિ ॥ ૮૧॥

ખ્વર્ભાનુગુલિકૌ તત્ર વિષવૈદ્યો વિષાર્દિતઃ ।
સ્વાંશકાત્ પઞ્ચમે ભાવે કેવલે સંસ્થિતે શનૌ ॥ ૮૨॥

ધનુર્વિદ્યાવિદા જાતા ભવન્ત્યત્ર ન સંશયઃ ।
કેતૌ ચ કેવલે તત્ર ઘટિકાયન્ત્રકારકઃ ॥ ૮૩॥

બુધે પરમહંસો વા દણ્ડી ભવતિ માનવઃ ।
લોહયન્ત્રી તથા રાહૌ રવૌ ખેઙ્ગધરો ભવેત્ ॥ ૮૪॥

કેવલે ચ કુજે તત્ર જાતઃ કુન્તાસ્ત્રધારકઃ ।
સ્વાંશે વા પન્ઙચમે સ્વાંશાચ્ચન્દ્રેજ્યૌ સંસ્થિતૌ તદા ॥ ૮૫॥

ગ્રન્થકર્તા ભવેજ્જાતઃ સર્વવિદ્યાવિશારદઃ ।
તત્ર દૈત્યગુરૌ કિઞ્ચિદૂનગ્રન્થકરો ભવેત્ ॥ ૮૬॥

બુધે તત્ર તતોઽપ્યૂનગ્રન્થકર્ત્તા પ્રજાયતે ।
તત્ર શુક્રે કવિર્વાગ્મી કાવ્યજ્ઞશ્ચ પ્રજાયતે ॥ ૮૭॥

સર્વવિદ્ગ્રાન્થિકો જીવે ન વાગ્મી ચ સભાદિષુ ।
શબ્દજ્ઞશ્ચ વિશેષેણ વેદવેદાન્તવિત્ તથા ॥ ૮૮॥

સભાજડો ભવેદ્ બાલ ઉક્તસ્થાનગતે શનૌ ।
મીમાંસકો ભવેન્નૂનમુક્તસ્થાનગતે બુધે ॥ ૮૯॥

સ્વાંશે વા પઞ્ચમે ભૌમે જાતો નૈયાયિકો ભવેત્ ।
ચન્દ્રે ચ સાંખ્યયોગજ્ઞઃ સાહિત્યજ્ઞશ્ચ ગાયકઃ ॥ ૯૦॥

રવૌ વેદાન્તવિચ્ચૈવ ગીતજ્ઞશ્ચ પ્રજાયતે ।
કેતૌ ચ ગણિતજ્ઞઃ સ્યાજ્જ્યોતિઃશાસ્ત્રવિશારદઃ ॥ ૯૧॥

સમ્પ્રદાયસ્ય સંસિદ્ધિર્ગુરુસમ્બન્ધતો ભવેત્ ।
દ્વિતીયે ચ તૃતીયે ચ સ્વાંશાદેવં વિચારયેત્ ॥ ૯૨॥

ભાવે સૂક્ષ્મફલં જ્ઞાત્વા જાતકસ્ય ફલં વદેત્ ।
કેતૌ સ્વાંશાદ્વિતીયે વા તૃતીયે સ્તબ્ધવાગ્ ભવેત્ ॥ ૯૩॥

પાપદૃષ્ટે વિશેષેણ માનવો વક્તુમક્ષમઃ ।
સ્વાંશાલ્લગ્નાત્ પદાદ્વાઽપિ દ્વિતીયાષ્ટમભાવયોઃ ॥ ૯૪॥

કેમદ્રુમઃ પાપસામ્યે ચન્દ્રદૃષ્ટૌ વિશેષતઃ ।
અત્રાઽધ્યાયે ચ યે યોગાઃ સફલાઃ કથિતા મયા ॥ ૯૫॥

યોગકર્તૃદશાયાન્તે જ્ઞેયાઃ સર્વે ફલપ્રદાઃ ।
એવં દશાપ્રદાદ્રાશૈર્દ્વિતીયાષ્ટમયોર્દ્વિજ ॥ ૯૬॥

ગ્રહસામ્યે ચ વિજ્ઞેયો યોગઃ કેમદ્રુમોઽશુભઃ ।
દશાપ્રારમ્ભસમયે સલગ્નાન્ સાધયેદ્ ગ્રહાન્ ॥ ૯૭॥

જ્ઞેયસ્તત્રાપિ યોગોઽયં પાપસામ્યેઽર્થરન્ધ્રયોઃ ।
એવં તન્વાદિભાવાનાં સૂર્યાદીનાં નભસદામ્ ॥ ૯૮॥

તત્તત્સ્થિત્યનુસારેણ ફલં વાચ્યં વિપશ્ચિતા ।
ઇતિ સંક્ષેપતઃ પ્રોક્તં કારકાંશફલં મયા ॥ ૯૯॥

---

## અથ યોગકારકાધ્યાયઃ ॥ ૩૪॥

કારકાંશવશાદેવં ફલં પ્રોક્તં મયા દ્વિજ ।
અથ ભાવાધિપત્યેન ગ્રહયોગફલં સ્રૃણુ ॥ ૧॥

કેન્દ્રાધિપતયઃ સૌમ્યા ના દિશન્તિ શુભં ફલમ્ ।
ક્રૂરા નૈવાઽશુભં કુર્યુઃ શુભદાશ્ચ ત્રિકોણપાઃ ॥ ૨॥

લગ્નં કેન્દ્રત્રિકોણત્વાદ્ વિશેષેણ શુભપ્રદમ્ ।
પઞ્ચમં નવમં ચૈવ વિશેષધનમુચ્યતે ॥ ૩॥

સપ્તમં દશમં ચૈવ વિશેષસુખમુચ્યતે ।
ત્રિષડાયાધિપાઃ સર્વે ગ્રહાઃ પાપફલાઃ સ્મૃતાઃ ॥ ૪॥

વ્યયદ્વિતીયરન્ધ્રેશાઃ સાહચર્યાત્ ફલપ્રદાઃ ।
સ્થાનાન્તરાનુરોધાત્તે પ્રબલાશ્ચોત્તરોત્તરમ્ ॥ ૫॥

તત્ર ભાગ્યવ્યયેશત્વાદ્રન્ધ્રેશો ન શુભપ્રદઃ ।
ત્રિમદાયાધિપત્વેઽથો કોણપત્વે તુ સત્ફલઃ ॥ ૬॥

ઉક્તેષ્વેષુ બલી યોગો નિર્બલસ્ય પ્રબાધકઃ ।
ન રન્ધ્રેશત્વદોષોઽત્ર સૂર્યાચન્દ્રમસોર્ભવેત્ ॥ ૭॥

ગુરુશુક્રૌ શુભૌ પ્રોક્તૌ ચન્દ્રો મધ્યમ ઉચ્યતે ।
ઉદાસીનો બુધઃ ખ્યાતઃ પાપા રવ્યાર્કિભૂમિજાઃ ॥ ૮॥

પૂર્ણેન્દુજ્ઞેજ્યશુક્રાશ્ચ પ્રબલા ઉત્તરોત્તરમ્ ।
ક્ષીણેન્દ્વર્કાર્કિભૂપુત્રાઃ પ્રબલાશ્ચ યથોત્તરમ્ ॥ ૯॥

કેન્દ્રાધિપત્યદોષોયઃ શુભાનાં કથિતો હિ સઃ ।
ચન્દ્રજ્ઞગુરુશુક્રાણાં પ્રબલાશ્ચોત્તરોત્તરમ્ ॥ ૧૦॥

કેન્દ્રકોણપતી સ્યાતાં પરસ્પરગૃહોપગૌ ।
એકભે દ્વૌ સ્થિતૌ વાપિ હ્યેકભેઽન્યતરઃ સ્થિતઃ ॥ ૧૧॥

પૂર્ણદૃષ્ટ્યેક્ષિતૌ વાપિ મિથો યોગકારૌ તદા ।
યોગેઽસ્મિન્ જાયતે ભૂપો વિખ્યાતો વા જનો ભવેત્ ॥ ૧૨॥

કોણેશત્વે યદૈકસ્ય કેન્દ્રેશત્વં ચ જાયતે ।
કેન્દ્રે કોણે સ્થિતો વાઽસૌ વિશેષાદ્યોગકારકઃ ॥ ૧૩॥

કેન્દ્રેશત્વેન પાપાનાં યા પ્રોક્તા શુભકારિતા ।
સા ત્રિકોણાધિપત્યેઽપિ ન કેન્દ્રેશત્વમાત્રતઃ ॥ ૧૪॥

કેન્દ્રકોણાધિપાવેવ પાપસ્થાનાધિપૌ યદા ।
તયોઃ સમ્બન્ધમાત્રેણ ન યોગં લભતે નરઃ ॥ ૧૫॥

યદ્ભાવેશયુતૌ વાપિ યદ્યદ્ભાવસમાગતૌ ।
તત્તત્ફલાનિ પ્રબલૌ પ્રદિશેતાં તમોગ્રહૌ ॥ ૧૬॥

યદિ કેન્દ્રે ત્રિકોણે વા નિવસેતાં તમોગ્રહૌ ।
નાથેનાત્યતરેણાઢ્યૌ દૃષ્ટૌ વા યોગકારકૌ ॥ ૧૭॥

કસ્મિલ્લગ્ને પ્રજાતસ્ય કે ગ્રહા યોગકારકાઃ ।

કે ચાઽશુભપ્રદાઃ ખેટાઃ કૃપયા વદે મે મુને ॥ ૧૮॥

યથા પૃષ્ટં ત્વયા વિપ્ર તથોદાહરણં બ્રુવે ।
રન્ધ્રેશત્વેઽપિ ભૂપુત્રો ભવેચ્છુભસહાયવાન્ ॥ ૧૯॥

મન્દસૌમ્યસિતાઃ પાપાઃ શુભૌ ગુરુદિવાકરૌ ।
ન શુભં યોગમત્રેણ પ્રભવેચ્છનિજીવયોઃ ॥ ૨૦॥

પારતન્ત્ર્યેણ જીવસ્ય પાપકર્માપિ નિશ્ચિતમ્ ।
શુક્રઃ સાક્ષાન્નિહન્તા સ્યાન્મારકત્વેન લક્ષિતઃ ॥ ૨૧॥

મન્દાદયોઽપિ હન્તારો ભવેયુઃ પાપિનો ગ્રહાઃ ।
મેષલગ્નોદ્ભવસ્યૈવં ફલં જ્ઞેયં દ્વિજોત્તમ ॥ ૨૨॥

જીવશુક્રેન્દવઃ પાપાઃ શુભૌ શનિદિવાકરૌ ।
રાજયોગકરઃ સૌરિર્બુધસ્ત્વલ્પશુભપ્રદઃ ॥ ૨૩॥

જીવાદયો કુજશ્ચાપિ સન્તિ મારકલક્ષણાઃ ।
વૃષલગ્નોદ્ભવસ્યૈવં ફલાન્યૂહ્યાનિ સૂરિભિઃ ॥ ૨૪॥

ભૌમજીવારુણાઃ પાપાઃ એક એવ કવિઃ સુભઃ ।
શનૈશ્ચરણે જીવસ્ય યોગો મેષભવો યથા ॥ ૨૫॥

શશી મુખનિહન્તાઽસૌ સાહચર્યાચ્ચ પાકદઃ ।
દ્વન્દ્વલગ્નોદ્ભવસ્યૈવં ફલાન્યૂહ્યાનિ પંડિતૈઃ ॥ ૨૬॥

ભાર્ગવેન્દુસુતૌ પાપૌ ભૂસુતેજ્યેન્દવઃ શુભાઃ ।
પૂર્ણયોગકરઃ સાક્ષાન્મંગલો મંગલપ્રદઃ ॥ ૨૭॥

નિહન્તાઽર્કસુતોઽર્કસ્તુ સાહચર્યાત્ ફલપ્રદઃ ।
કર્કલગ્નોદ્ભવસ્યૈવં ફલં પ્રોક્તં મનીષિભિઃ ॥ ૨૮॥

સૌમ્યશુક્રાર્કજાઃ પાપાઃ કુજેજ્યાર્કાઃ શુભાવહાઃ ।
પ્રભવેદ્યોગમાત્રેણ ન શુભં ગુરુશુક્રયોઃ ॥ ૨૯॥

મારકસ્તુ શનિશ્ચન્દ્રઃ સાહચર્યાત્ ફલપ્રદઃ ।
સિંહલગ્ને પ્રજાતસ્ય ફલં જ્ઞેયં વિપશ્ચિતા ॥ ૩૦॥

કુજજીવેન્દવઃ પાપાઃ બુધશુક્રૌ શુભાવહૌ ।
ભાર્ગવેન્દુસુતાવેવ ભવેતાં યોગકારકૌ ॥ ૩૧॥

મારકોઽપિ કવિઃ સૂર્યઃ સાહચર્યફલપ્રદઃ ।
કન્યાલગ્નોદ્ભવસ્યૈવં ફલાન્યૂહ્યાનિ સૂરિભિઃ ॥ ૩૨॥

જીવાર્કભૂસુતાઃ પાપાઃ શનૈશ્ચરબુધૌ શુભૌ ।
ભવેતાં રાજયોગસ્ય કારકૌ ચન્દ્રતત્સુતૌ ॥ ૩૩॥

કુજો નિહન્તિ જીવાદ્યાઃ પાપા મારકલક્ષણાઃ ।
શુક્રઃ સમઃ ફલાન્યેવં વિજ્ઞેયાનિ તુલોદ્ભવે ॥ ૩૪॥

સિતજ્ઞશનયઃ પાપાઃ શુભૌ ગુરુનિશાકરૌ ।
સૂર્યાચન્દ્રમસાવેવ ભવેતાં યોગકારકૌ ॥ ૩૫॥

કુજઃ સમઃ સિતાદ્યાશ્ચ પાપા મારકલક્ષણાઃ ।
એવં ફલં ચ વિજ્ઞેયં વૃશ્ચિકોદયજન્મનઃ ॥ ૩૬॥

એક એવ કવિઃ પાપઃ શુભૌ ભૌમદિવાકરૌ ।
યોગો ભાસ્કરસૌમ્યાભ્યાં નિહન્તા ભાસ્કરાત્મજઃ ॥ ૩૭॥

ગુરુઃ સમફલઃ ખ્યાતઃ શુક્રો મારકલક્ષણઃ ।
ધનુર્લગ્નોદ્ભવસ્યૈવં ફલં જ્ઞેયં વિપશ્ચિતા ॥ ૩૮॥

કુજજીવેન્દવઃ પાપાઃ શુભૌ ભાર્ગવચન્દ્રજૌ ।
મન્દઃ સ્વયં ન હન્તા સ્યાદ્ હન્તિ પાપાઃ કુજાદયઃ ॥ ૩૯॥

સૂર્યઃ સમફલઃ પ્રોક્તઃ કવિરેકઃ સુયોગકૃત્ ।
મૃગલગ્નોદ્ભવસ્યૈવં ફલાન્યૂહ્યાનિ સૂરિભિઃ ॥ ૪૦॥

જીવચન્દ્રકુજાઃ પાપાઃ શુક્રસૂર્યાત્મજૌ શુભૌ ।
રાજયોગકરો જ્ઞેજઃ કવિરેવ બૃહસ્પતિઃ ॥ ૪૧॥

સૂર્યો ભૌમશ્ચ હન્તારો બુધો મધ્યફલઃ સ્મૃતઃ ।
કુમ્ભલગ્નોદ્ ભવસ્યૈવં ફલાન્યૂહ્યાનિ સૂરિભિઃ ॥ ૪૨॥

મન્દશુક્રાંશુમત્સૌમ્યાઃ પાપા ભૌમવિધૂ શુભૌ ।
મહીસુતગુરૂ યોગકારકૌ ચ મહીસુતઃ ॥ ૪૩॥

મારકોઽપિ ન હન્તાઽસૌ મન્દજ્ઞૌ મારકૌ સ્મૃતૌ ।
મીનલગ્નોદ્ ભવસ્યૈવં ફલાનિ પરિચિન્તયેત્ ॥ ૪૪॥

એવં ભાવાધિપત્યેન જન્મલગ્નવશાદિહ ।
શુભત્વમશુભત્વ ચ ગ્રહાણાં પ્રતિપાદિતમ્ ॥ ૪૫॥

અત્યાનપિ પુનર્યોગાન્ નાભસાદીન્ વિચિન્ત્ય વૈ ।
દેહિના ચ ફલં વાચ્યં પ્રવક્ષ્યામિ ચ તાનહમ્ ॥ ૪૬॥

---

અથ નાભસયોગાધ્યાયઃ ॥ ૩૫॥

અધુના નાભસા યોગાઃ કથ્યન્તે દ્વિજસત્તમ ।
દ્વાત્રિંશાત્ તત્પ્રભેદાસ્તુ શતદ્વાષ્ટાદશોન્મિતાઃ ॥ ૧॥

આશ્રયાખ્યાસ્ત્રયો યોગાઃ દલસંજ્ઞં દ્વયં તતઃ ।
આકૃતિર્વિંશતિઃ સંખ્યાઃ સપ્ત યોગાઃ પ્રકીર્તિતાઃ ॥ ૨॥

રજ્જુશ્ચ મુસલશ્ચૈવ નલશ્ચેત્યાશ્રયાસ્ત્રયઃ ।
માલાખ્યઃ સર્પસંજ્ઞશ્ચ દલયોગૌ પ્રકીર્તિતૌ ॥ ૩॥

ગદાખ્યઃ શકટાખ્યશ્ચ સ્રૃઙ્ગાટકવિહંગસૌ ।
હલવજ્રયવાશ્ચૈવ કમલં વાપિયૂપકૌ ॥ ૪॥

શરશક્તિદણ્ડનૌકાકૂટચ્છત્રધ્નૂષિ ચ ।
અર્ધચન્દ્રસ્તુ ચક્રં ચ સમુદ્રશ્ચેતિ વિંશતિઃ ॥ ૫॥

સંખ્યાખ્યાવલ્લકીદામપાશકેદારશૂલકાઃ ।
યુગો ગોલશ્ચ સપ્તૈતે યુક્તા દન્તમિતા દ્વિજ ॥ ૬॥

સર્વૈશ્ચરે સ્થિતૈ રજ્જુઃ સ્થિરસ્થૈર્મુસલઃ સ્મૃતઃ ।
નલાખ્યો દ્વિસ્વભાવસ્થૈરાશ્રયાખ્યા ઇમે સ્મૃતાઃ ॥ ૭॥

કેન્દ્રત્રયગતૈઃ સૌમ્યૈઃ પાપૈર્વા દલસંજ્ઞકૌ ।
ક્રમાન્માલાભુજંગાખ્યૌ શુભાશુભફલપ્રદૌ ॥ ૮॥

આસન્નકેન્દ્રદ્વયગૈઃ સર્વૈર્યોગો ગદાહ્વયઃ ।
શકટં લગ્નજાયાસ્થૈઃ ખામ્બુગૈર્વિહગઃ સ્મૃતઃ ॥ ૯॥

યોગઃ સ્રૃઙ્ગાટકં નામ લગ્નાત્મજતપઃસ્થિતૈઃ ।
અન્યસ્થાનાત્ ત્રિકોણસ્થૈઃ સર્વૈર્યોગો હલાભિધઃ ॥ ૧૦॥

લગ્નજાયાસ્થિતૈઃ સૌમ્યૈઃ પાપાખ્યૈઃ ખાડમ્બુસંસ્થિતૈઃ ।
યોગો વજ્રાભિધઃ પ્રોક્તઃ વીપરીતસ્થિતૈર્યવઃ ॥ ૧૧॥

સર્વકેન્દ્રગતૈઃ સર્વૈર્મિશ્રૈઃ કમલસંજ્ઞકઃ ।

કેન્દ્રાદન્યત્રગૈઃ સર્વૈર્યોગો વાપીસમાહ્વયઃ ॥ ૧૨॥

યૂપો લગ્નાચ્ચતુર્ભસ્થૈઃ શરસ્તુર્યાચ્ચતુર્ભગૈઃ ।
શક્તિર્મદાચ્ચતુર્ભસ્થૈર્દણ્ડો મધ્યાચ્ચતુર્ભગૈઃ ॥ ૧૩॥

લગ્નાત્ સપ્તમગૈર્નૌ કા કૂટસ્તુર્યાચ્ચ સપ્તમૈઃ ।
છત્રાખ્યઃ સપ્તમાદેવં ચાપં મધ્યાદ્ ભસપ્તગૈઃ ॥ ૧૪॥

લગ્નાદેકાન્તરસ્થૈશ્ચ ષડ્ભગૈશ્ચક્રમુચ્યતે ।
ધનાદેકાન્તરસ્થૈસ્તુ સમુદ્રઃ ષડગૃહાશ્રિતૈ ॥ ૧૫॥

એકરાશિસ્થિતૈર્ગોલો યુગાખ્યો દ્વિભસંસ્થિતૈઃ ।
શૂલસ્તુ ત્રિભગૈઃ પ્રોક્તઃ કેદારસ્તુ ચતુર્ભગૈઃ ॥ ૧૬॥

પઞ્ચરાશિસ્થતૈઃ પાશા દામાખ્યઃ ષડ્ગૃહાશ્રિતૈઃ ।
વીન્>આ સપ્તભગૈઃ સર્વૈર્વિહાયાન્યાનુદીરિતાન્ ॥ ૧૭॥

અટનપ્રિયાઃ સુરૂપાઃ પરદેશસ્વાસ્થ્યભાગિનો મનુજાઃ ।
ક્રૂરાઃ ખલસ્વભાવા રજ્જુપ્રભવાઃ સદા કથિતાઃ ॥ ૧૮॥

માનજ્ઞાનધનાદ્યૈર્યુક્તા ભૂપપ્રિયાઃ ખ્યાતાઃ ।
બહુપુત્રાઃ સ્થિરચિત્તા મુસલસમુત્થા ભવન્તિ નરાઃ ॥ ૧૯॥

ન્યૂનાતિરિક્તદેહા ધનસઞ્ચયભાગિનોઽતિનિપુણાશ્ચ ।
બન્ધુહિતાશ્ચ સુરૂપા નલયોગે સમ્પ્રસૂયન્તે ॥ ૨૦॥

નિત્યં સુખપ્રધાના વાહનવસ્ત્રાન્નભોગસમ્પન્ના ।
કાન્તા સુબહુસ્ત્રીકા માલાયાં સમ્પ્રસૂતાઃ સ્યુઃ ॥ ૨૧॥

વુષમાઃ ક્રૂરા નિઃસ્વા નિત્યં દુઃખાર્દિતાઃ સુદીનાશ્ચ ।
પરભક્ષપાનનિરતાઃ સર્પપ્રભવા ભવન્તિ નરાઃ ॥ ૨૨॥

સતતોદ્યુક્તાર્થવશા યજ્વાનઃ શાસ્ત્રગેયકુશલાશ્ચ ।
ધનકનકરત્નસમ્પત્સંયુક્તા માનવા ગદાયાં તુ ॥ ૨૩॥

રોગાર્તાઃ કુનખા મૂર્ખાઃ શકટાનુજીવિનો નિઃસ્વા ।
મિત્રસ્વજનવિહીનાઃ શકટે જાતા ભવન્તિ નરાઃ ॥ ૨૪॥

ભ્રમણરુચયોવિકૃષ્ટા દૂતાઃ સુરતાનુજીવનો ધૃષ્ટાઃ ।
કલહપ્રિયાશ્ચ નિત્યં વિહગે યોગે સદા જાતાઃ ॥ ૨૫॥

પ્રિયકલહાઃ સમરસહાઃ સુખિનો નૃપતેઃ શુભકલત્રાઃ ।
આઢ્યા યુવતિદ્વેષ્યાઃ સ્રૃઙ્ગાટકસમ્ભવા મનુજાઃ ॥ ૨૬॥

બહ્વાશિનો દરિદ્રાઃ કૃષીવલા દુઃખિતાશ્ચ સોદ્વેગા ।
બન્ધુસુહૃદિભઃ ત્યક્તાઃ પ્રેષ્યાઃ હલસંજ્ઞકે સદા પુરુષાઃ ॥ ૨૭॥

આદ્યન્તવયઃસુખિનઃ શૂરાઃ સુભગા નિરીહાશ્ચઃ ।
ભાગ્યવિહીના વજ્રે જાતાઃ ખલા વિરુદ્ધાશ્ચ ॥ ૨૮॥

વ્રતનિયમમઙ્ગલપરા વયસો મધ્યે સુખાર્થપુત્રયુતા ।
દાતારઃ સ્થિરચિત્તા યવયોગભવાઃ સદા પુરુષાઃ ॥ ૨૯॥

વિભવગુણાઢ્।યાઃ પુરુષાઃ સ્થિરાયુષો વિપુલકીર્તય શુદ્ધાઃ ।
શુભશતકાઃ પૃથ્વીશાઃ કમલભવાઃ માનવા નિત્યમ્ ॥ ૩૦॥

નિધિકરણે નિપુણધિયઃ સ્થિરાર્થસુખસંયુતા સુતયુતાશ્ચ ।
નયનસુખસમ્પ્રહૃષ્ટા વાપીયોગેન રાજાનઃ ॥ ૩૧॥

આત્મવિદિજ્યાનિરતઃ સ્ત્રિયા યુતઃ સત્ત્વસમ્પન્નઃ ।
વ્રતનિયમરતમનુસ્યો યૂપે જાતો વિશિષ્ટશ્ચ ॥ ૩૨॥

ઇષુકારા બન્ધનપાઃ મૃગયાધનસેવિતાશ્ચ મંસાદા ।
હિંસ્રાઃ કુશિલ્પકારાઃ શરયોગે માનવાઃ પ્રસૂયન્તે ॥ ૩૩॥

ધનરહિતવિફલદુઃખિતનીચલસાશ્ચિરાયુષઃ પુરુષાઃ ।
સંગ્રામબુદ્ધિનિપુણાઃ શક્ત્યાં જાતાઃ સ્થિરાઃ શુભગાઃ ॥ ૩૪॥

હતપુત્રદારનિઃસ્વાઃ સર્વત્ર ચ નિર્ઘૃણાઃ સ્વજનબાહ્યાઃ ।
દુઃખિતનીચપ્રેષ્યા દણ્ડપ્રભવા ભવન્તિ નરાઃ ॥ ૩૫॥

સલિલોપજીવિવિભવાઃ બહ્વાશાઃ ખ્યાતકીર્તયો દુષ્ટાઃ ।
કૃપણા મલિના લુબ્ધા નૌસઞ્જાતાઃ ખલાઃ પુરુષાઃ ॥ ૩૬॥

અનૃતકથનબન્ધનપા નિષ્કિઞ્ચનાઃ શઠાઃ ક્રૂરાઃ ।
કૂટસમુત્થા નિત્યં ભવન્તિ ગિરિદુર્ગવાસિનો મનુજાઃ ॥ ૩૭॥

સ્વજનાશ્રયો દયાવાન્નાનાનૃપવલ્લભઃ પ્રકૃષ્ટમતિઃ ।
પ્રથમેઽન્ત્યે વયસિ નરાઃ સુખવાન્ દીર્ઘાયુરાતપત્રી સ્યાત્ ॥ ૩૮॥

આનૃતિકગુપ્તપાલાશ્ચોરાઃ કિતવાશ્ચ કાનને નિરતાઃ ।
કાર્મુકયોગે જાતા ભાગ્યવિહીનાઃ શુભા વયોમધ્યે ॥ ૩૯॥

સેનાપતયઃ સર્વી કાન્તશરીરા નૃપપ્રિયા બલિનઃ ।
મણિકનકભૂષણયુતા ભવન્તિ યોગેઽર્ધચન્દ્રાખ્યે ॥ ૪૦॥

પ્રણતાઽઽશેષનરાધિપકિરીટરત્નપ્રભાસ્ફુરિતપાદઃ ।
ભવતિ નરેન્દ્રો મનુજશ્ચક્રે યો જાયતે યોગે ॥ ૪૧॥

બહુરત્નધનસમૃદ્ધા ભોગયુતા ધનજનપ્રિયાઃ સસુતા ।
ઉદધિસમુત્થાઃ પુરુષાઃ સ્થિરવિભવાઃ સાધુશીલાશ્ચ ॥ ૪૨॥

પ્રિયગીતનૃત્યવાદ્યા નિપુણાઃ સુખિનશ્ચ ધનવન્તઃ ।
નેતારો બહુભૃત્યા વીણાયાં કીર્તિતાઃ પુરુષાઃ ॥ ૪૩॥

દામ્નિ સુજનોપકારી નયધનયુક્તો મહેશ્વરઃ ખ્યાતઃ ।
બહુસુતરત્નસમૃદ્ધો ધીરો જાયેત વિદ્વાંશ્ચ ॥ ૪૪॥

પાશે બન્ધનભાજઃ કાર્યે દક્ષાઃ પ્રપઞ્ચકારાશ્ચ ।
બહુભાષિણો વિશીલા બહુભૃત્યાઃ સમ્પ્રતાનાશ્ચ ॥ ૪૫॥

સુબહૂનામુપયોજ્યાઃ કૃષીવલાઃ સત્યવાદિનઃ સુખિનઃ ।
કેદારે સમ્ભૂતાશ્ચલસ્વભાવા ધનૈર્યુક્તાઃ ॥ ૪૬॥

તીક્ષ્ણાલસધનહીના હિંસ્રાઃ સુબહિષ્કૃતા મહાશૂરાઃ ।
સંગ્રામે લબ્ધયશા શૂલે યોગે ભવન્તિ નરાઃ ॥ ૪૭॥

પાખણ્ડવાદિનો વા ધનરહિતા વા બહિષ્કૃતા લોકે ।
સુતમાતૃધર્મરહિતા યુગયોગે યે નરા જાતાઃ ॥ ૪૮॥

બલસંયુક્તા વિધના વદ્યાવિજ્ઞાનવર્જિતા મલિના ।
નિત્યં દુઃખિતદીના ગોલે યોગે ભવન્તિ નરાઃ ॥ ૪૯॥

સર્વાસ્વપિ દશસ્વેતે ભવેયુઃ ફલદાયિનઃ ।
પ્રાણિનામિતિ વિજ્ઞેયાઃ પ્રવદન્તિ તવાગ્રજાઃ ॥ ૫૦॥

---

## અથ વિવિધયોગાધ્યાયઃ ॥ ૩૬॥

લગ્ને શુભયુતે યોગઃ શુભઃ પાપયુતેઽશુભઃ ।
વ્યયસ્વગૈઃ શુભૈઃ પાપૈઃ ક્રમાદ્યોગૌ શુભાઽશુભૌ ॥ ૧॥

શુભયોગોદ્ભવો વાગ્મી રૂપશીલગુણવન્વિતઃ ।

પાપયોગોદ્ભવઃ કામી પાપકર્મા પરાર્થયુક્ ॥ ૨॥

કેન્દ્રે દેવગુરૌ લગ્નાચ્ચન્દ્રાદ્વા શુભદૃગ્યુતે ।
નીચાસ્તારિગૃહૈર્હીને યોગોઽયં ગજકેસરી ॥ ૩॥

ગજકેસરીસઞ્જાતસ્તેજસ્વી ધનવાન્ ભવેત્ ।
મેધાવી ગુણસમ્પન્નો રાજપ્રિયકરો નરઃ ॥ ૪॥

દશમેઽઙ્ગાત્તથા ચન્દ્રાત્ કેવલૈશ્ચ શુભૈર્યુતે ।
સ યોગોઽમલકીર્ત્યાખ્યઃ કીર્તિરાચન્દ્રતારકી ॥ ૫॥

રાજપૂજ્યે મહાભોગી દાતા બન્ધુજનપ્રિયઃ ।
પરોપકારી ધર્માત્મા ગુણઢ્યોઽમલકીર્તિજઃ ॥ ૬॥

સપ્તમે ચાઽષ્ટમે શુદ્ધે શુભગ્રહયુતેઽથવા ।
કેન્દ્રેષુ શુભયુક્તેષુ યોગઃ પર્વતસંજ્ઞકઃ ॥ ૭॥

ભાગ્યવાન્ પર્વતોત્પન્નઃ વાગ્મી દાતા ચ શાસ્ત્રવિત્ ।
હાસ્યપ્રિયો યશસ્વી ચ તેજસ્વી પુરનાયકઃ ॥ ૮॥

સુખેશેજ્યૌ મિથઃ કેન્દ્રગતૌ બલિનિ લગ્નપે ।
કાહલો વા સ્વભોચ્ચસ્થે સુખેશે કર્મપાન્વિતે ॥ ૯॥

ઓજસ્વી સાહસી ધૂર્તશ્ચતુરઙ્ગબલાન્વિતઃ ।
યત્કિઞ્ચિદ્ ગ્રામનાથશ્ચ કાહલે જાયતે નરઃ ॥ ૧૦॥

લગ્નેશે તુઙ્ગગે કેન્દ્રે ગુરુદૃષ્ટે તુ ચામરઃ ।
શુભદ્વયે વિલગ્ને વા નવમે દશમે મદે ॥ ૧૧॥

રાજા વા રાજપુજ્યો વા ચિરજીવી ચ પણ્ડિતઃ ।
વાગ્મી સર્વકલાવિદ્ વા ચામરે જાયતે જનઃ ॥ ૧૨॥

સવલે લગ્નપે પુત્રષષ્ઠપૌ કેન્દ્રગૌ મિથઃ ।
શંખો વા લગ્નકર્મેશૌ ચરે બલિનિ ભાગ્યપે ॥ ૧૩॥

ધનસ્ત્રીપુત્રસંયુક્તો દયાલુઃ પુણ્યવાન્ સુધીઃ ।
પુણ્યકર્મા ચિરઞ્જીવી શંખયોગોદ્ભવો નરઃ ॥ ૧૪॥

સબલે ભાગ્યપે ભેરી ખગૈઃ સ્વાન્ત્યોદયાસ્તગૈઃ ।
સબલે ભાગ્યપે વાઽસૌ કેન્દ્રે શુક્રેજ્યલગ્નપૈઃ ॥ ૧૫॥

ધનસ્ત્રીપુત્રસંયુક્તો ભૂપઃ કીર્તિગુણાન્વિતઃ ।
આચારવાન્ સુખી ભોગી ભેરીયોગે જનો ભવેત્ ॥ ૧૬॥

સબલે લગ્નપે ખેટાઃ કેન્દ્રે કોણે સ્વભોચ્ચગાઃ ।
મૃગઙ્ગયોગો જાતોઽત્ર ભૂપો વા તત્સમઃ સુખી ॥ ૧૭॥

કીમેશે કર્મગે તુઙ્ગે કર્મેશે ભાગ્યપાન્વિતે ।
યોગઃ શ્રીનાથસંજ્ઞોઽત્ર જાતઃ શુક્રસમો નૃપઃ ॥ ૧૮॥

કર્મેશે સુતગે કેન્દ્રે બુધેઽર્કે સબલે સ્વભે ।
ચન્દ્રાત્ કોણે ગુરૌ જ્ઞે વા કુજે લાભે ચ શારદઃ ॥ ૧૯॥

ધનસ્ત્રીપુત્રસંયુક્તઃ સુખી વિદ્વાન્ નૃપપ્રિયઃ ।
તપસ્વી ધર્મસંયુક્તઃ શારદે જાયતે જનઃ ॥ ૨૦॥

ધર્મલગ્નગતે સૌમ્યે પઞ્ચમે સદસદ્યુતે ।
પાપે ચ ચતુરસ્રસ્થે યોગોઽયં મત્સ્યસંજ્ઞકઃ ॥ ૨૧॥

કાલજ્ઞઃ કરુણામૂર્તિર્ગુણધીબલરૂપવાન્ ।
યશોવિદ્યાતપસ્વી ચ મત્સ્યયોગે હિ જાયતે ॥ ૨૨॥

પુત્રારિમદગાઃ સૌમ્યાઃ સ્વભોચ્ચસુહૃદંશગાઃ ।
ત્રિલાભોદયગાઃ પાપાઃ કૂર્મયોગઃ સ્વભોચ્ચગાઃ ॥ ૨૩॥

કૂર્મયોગે જનો ભૂપો ધીરો ધર્મગુણાન્વિતઃ ।
કીર્તિમાનુપકારી ચ સુખી માનવનાયકઃ ॥ ૨૪॥

ભાગ્યેશે ધનભાવાસ્થે ધનેશે ભાગ્યભાવગે ।
લગ્નેશે કેન્દ્રકોણસ્થે ખડ્ગયોગઃ સ કથ્યતે ॥ ૨૫॥

ખડ્ગયોગે સમુત્પન્નો ધનભાગ્યસુખાન્વિતઃ ।
શાસ્ત્રજ્ઞો બુદ્ધિવીર્યાઢ્યઃ કૃતજ્ઞઃ કુશલો નરઃ ॥ ૨૬॥

કેન્દ્રે મૂલત્રિકોણસ્તે ભાગ્યેશે વા સ્વભોચ્ચગે ।
લગ્નાધિપે બલાઢ્યે ચ લક્ષ્મીયોગઃ પ્રકીર્ત્યતે ॥ ૨૭॥

સુરૂપો ગુણવાન્ ભૂપો બહુપુત્રધનાન્વિતઃ ।
યશસ્વી ધર્મસમ્પન્નો લક્ષ્મીયોગે જનો ભવેત્ ॥ ૨૮॥

લગ્ને સ્થિરે ભૃગૌ કેન્દ્રે ચન્દ્રકોણે શભાન્વિતે ।
માનસ્થાનગતે સૌરે યોગોઽયં કુસુમાભિધઃ ॥ ૨૯॥

ભૂપો વા ભૂપતુલ્યો વા દતા ભોગી સુખી જનઃ ।
કુલમુખ્યો ગુણી વિદ્વાન્ જાયતે કુસુમાહ્વયે ॥ ૩૦॥

દ્વિતીયે પઞ્ચમે જીવે બુધશુક્રયુતેક્ષિતે ।
ક્ષત્રે તયોર્વા સમ્પ્રમે યોગઃ સ ચ કલાનિધિઃ ॥ ૩૧॥

કલાનિધિસમુત્પન્નો ગુણવાન્ ભૂપવન્દિતઃ ।
રોગહીનઃ સુખી જાતો ધનવિદ્યાસમન્વિતઃ ॥ ૩૨॥

લગ્નેશતદ્ગતર્ક્ષેશતદ્ગતર્ક્ષેશતદંશપાઃ ।
કેન્દ્રે કોણે સ્વતુઙ્ગે વા યોગઃ કલ્પદ્રુમો મતઃ ॥ ૩૩॥

સર્વૈશ્વર્યયુતો ભૂપો ધર્માત્મા બલસંયુતઃ ।
યુદ્ધપ્રિયો દયાલુશ્ચ પારિજાતે નરો ભવેત્ ॥ ૩૪॥

સ્વાન્ત્યાષ્ટસ્થૈર્દ્વિતીયેશાદ્ હરિયોગઃ શુભગ્રહૈઃ ।
કામેશાદ્ બન્ધુધર્માષ્ટસ્થિતૈઃ સૌમ્યૈર્હરાભિધઃ ॥ ૩૫॥

લગ્નેશાદ્ બન્ધુકર્માયસ્થિતૈર્બ્રહ્માહ્વયઃ સ્મૃતઃ ।
એષુ જાતઃ સુખી વિદ્વાન્ ધનપુત્રાદિસંયુતઃ ॥ ૩૬॥

લગ્નાન્મદાષ્ટગૈઃ સૌમ્યૈઃ પાપદૃગ્યોગવર્જિતૈઃ ।
યોગો લગ્નાધિયોગોઽસ્મિન્ મહાત્મા શાસ્ત્રવિત્ સુખી ॥ ૩૭॥

લગ્નપે પારિજાતસ્થે સુખી વર્ગોત્તમે હ્યરુક્ ।
ગોપુરે ધનધાન્યાઢ્યા ભૂપઃ સિંહાસને સ્થિતે ॥ ૩૮॥

વિદ્વાન્ પારાવતે શ્રીમાન્ દેવલોકે સવાહનઃ ।
ઐરાવતસ્થિતે જાતો વિખ્યાતો ભૂપવન્દિતઃ ॥ ૩૯॥

---

અથ ચન્દ્રયોગાધ્યાયઃ ॥ ૩૭॥

સહસ્રરશ્મિતચન્દ્રે કણ્ટકાદિગતે ક્રમાત્ ।
ધનધીનૈપુણાદીનિ ન્યૂનમધ્યોત્તમાનિ હિ ॥ ૧॥

સ્વાંશે વા સ્વાધિમિત્રાંશે સ્થિતશ્ચ દિવસે શશી ।
ગુરુણા દૃશ્યતે તત્ર જાતો ધનસુખાન્વિતઃ ॥ ૨॥

સ્વાંશે વા સ્વાધિમિત્રાંશે સ્થિતશ્ચ શશભૃન્નિશિ ।

શુક્રેણ દૃશ્યતે તત્ર જાતો ધનસુખાન્વિતઃ ॥ ૩॥

એતદ્વિપર્યયસ્થે ચ શુક્રેજ્યાનવલોકિતે ।
જાયતેऽલ્પધનો બાલો યોગેऽસ્મિન્નિર્ધનોऽથવા ॥ ૪॥

ચન્દ્રાદ્રન્ધ્રારિકામસ્થૈ સૌમ્યૈઃ સ્યાધિયોગકઃ ।
તત્ર રાજા ચ મન્ત્રી ચ સેનાધીશશ્ચ બલક્રમાત્ ॥ ૫॥

ચન્દ્રાદ્ વૃદ્ધિગતૈઃ સર્વૈઃ શુભૈર્જાતો મહાધની ।
દ્વાભ્યાં મધ્યધનો જાત એકેનાऽલ્પધનો ભવેત્ ॥ ૬॥

ચન્દ્રાત્ સ્વાન્ત્યોભયસ્થે હિ ગ્રહે સૂર્યં બિના ક્રમાત્ ।
સુનફાખ્તોऽનફાખ્યશ્ચ યોગો દુરધરાહ્વયઃ ॥ ૭॥

રાજા વા રાજતુલ્યો વા ધીધનખ્યાતિમાગ્જનઃ ।
સ્વભુજાર્જિતવિત્તશ્ચ સુનફાયોગસમ્ભવઃ ॥ ૮॥

ભૂપોऽગદશરીરશ્ચ શીલવાન્ ખ્યાતકીર્તિમાન્ ।
સુરૂપશ્ચાऽનફાજાતો સુખૈઃ સર્વૈઃ સમન્વિતઃ ॥ ૯॥

ઉત્પન્નસુખભુગ્ દાતા ધનવાહનસંયુતઃ ।
સદ્ભૃત્યો જાયતે નૂનં જનો દુરધરાભવઃ ॥ ૧૦॥

ચન્દ્રાદાદ્યધનાऽન્ત્યસ્થો વિના ભાનું ન ચેદ્ગ્રહઃ ।
કશ્ચિત્ સ્યાદ્વા વિના ચન્દ્રં લગ્નાત્ કેન્દ્રગતોऽથ વા ॥ ૧૧॥

યોગઃ કેમદ્રુમો નામ તત્ર જાતોऽતિગર્હિતઃ ।
બુદ્ધિવિદ્યાવિહીનશ્ચ દરિદ્રાપત્તિસંયુતઃ ॥ ૧૨॥

અન્યયોગફલં હન્તિ ચન્દ્રયોગો વિશેષતઃ ।
સ્વફલં પ્રદદાતીતિ બુધો યત્નાદ્ વિચિન્તયેત્ ॥ ૧૩॥

## અથ રવિયોગાધ્યાયઃ ॥ ૩૮॥

સૂર્યાત્ સ્વન્ત્યોભયસ્થૈશ્ચ વિના ચન્દ્રં કુજાદિભિઃ ।
વેશિવોશિસમાખ્યૌ ચ તથોભયચરઃ ક્રમાત્ ॥ ૧॥

સમદૃક્ સત્યવાઙ્ મર્ત્યો દીર્ઘકાયોऽલસસ્તથા ।
સુખભાગલ્પવિત્તોऽપિ વેશિયોગસમુદ્ભવઃ ॥ ૨॥

વોશૌ ચ નિપુણો દાતા યશોવિદ્યાબલાવન્તિઃ ।
તથોભયચરે જાતો ભૂપો વા તત્સમઃ સુખી ॥ ૩॥

શુભગ્રહભવે યોગે ફલમેવં વિચિન્તયેત્ ।
પાપગ્રહસમુત્પન્ને યોગે તુ ફલમન્યથા ॥ ૪॥

---

## અથ રાજયોગાધ્યાયઃ ॥ ૩૯॥

અથાઽતઃ સમ્પ્રવક્ષ્યામિ રાયયોગાન્ દ્વિજોત્તમ ।
યેષાં વિજ્ઞાનમાત્રેણ રાજપૂજ્યો જનો ભવેત્ ॥ ૧॥

યે યોગાઃ શમ્ભુના પ્રોક્તાઃ પુરા શૈલસુતાગ્રતઃ ।
તેષાં સારમહં વક્ષ્યે તવાગ્રે દ્વિજનન્દન ॥ ૨॥

ચિન્તયેત્ કારકાંશે વા જનુર્લગ્નેઽથ વા દ્વિજ ।
રાજયોગકરૌ દ્વૌ દ્વૌ સ્ફુટૌ ખેટૌ પ્રયત્નતઃ ॥ ૩॥

આત્મકારકપુત્રાભ્યાં યોગમેકં પ્રકલ્પયેત્ ।
તનુપઞ્ચમનાથાભ્યાં તથૈવ દ્વિજસત્તમ ॥ ૪॥

લગ્નપુત્રેશયોરાત્મપુત્રકારકયોર્દ્વયોઃ ।
સમ્બન્ધાત્ પૂર્ણમર્ધં વા પાદં વીર્યાનુસારતઃ ॥ ૫॥

લગ્નેશે પઞ્ચમે ભાવે પઞ્ચમેશે ચ લગ્ને ।
પુત્રાત્મકારકૌ વિપ્ર લગ્ને ચ પઞ્ચમે સ્થિત ॥ ૬॥

સ્વોચ્ચે સ્વંશે સ્વભે વાઽપિ શુભગ્રહનિરીક્ષિતો ।
મહારાજાખ્યયોગોઽત્ર જાતઃ ખ્યાતઃ સુખાન્વિતઃ ॥ ૭॥

ભાગ્યેશઃ કારકો લગ્ને પઞ્ચમે સપ્તમેઽપિ વા ।
રાજયોગપ્રદાતારૌ શુભખેટયુતેક્ષિતૌ ॥ ૮॥

લગ્નેશાત્ કારકાચ્ચાપિ ધને તુર્યે ચ પઞ્ચમે ।
શુભખેટયુતે ભાવે જાતો રાજા ભવેદ્ ધ્રુવમ્ ॥ ૯॥

તૃતીયે ષષ્ઠભે તાભ્યાં પાપગ્રહયુતેક્ષિતે ।
જાતો રાજા ભવેદેવં મિશ્રે મિશ્રફલં વદેત્ ॥ ૧૦॥

સ્વાંશે વા પઞ્ચમે શુક્રે જીવેન્દુયુતવીક્ષિતે ।
લગ્ને લગ્નપદે વાઽપિ રાજવર્ગો ભવેન્નરઃ ॥ ૧૧॥

જન્માઙ્ગે કાલહોરાઙ્ગે કાલઙ્ગે યેન કેનચિત્ ।
એકગ્રહેણ સન્દૃષ્ટે ત્રિતયે રાજભાગ્ જનઃ ॥ ૧૨॥

લગ્નષડ્વર્ગકે ચૈવમેકખેટયુતેક્ષિતે ।
રાજયોગો ભવત્યેવ નિર્વિશંક દ્વિજોત્તમ ॥ ૧૩॥

પૂર્ણદૃષ્ટે પૂર્નયોગમર્ધદૃષ્ટેઽર્ધમેવ ચ ।
પાદદૃષ્ટે પાદયોગમિતિ જ્ઞેયં ક્રમાત્ ફલમ્ ॥ ૧૪॥

લગ્નત્રયે સ્વભોચ્ચસ્થે ખેટે રાજા ભવેદ્ ધ્રુવમ્ ।
યદ્વા લગ્ને દૃકાણેંઽશે સ્વોચ્ચખેટયુતે દ્વિજ ॥ ૧૫॥

પદે શુભ સચંદ્રે ચ ધને દેવગુરૌ તથા ।
સ્વોચ્ચસ્થખેટસન્દૃષ્ટે રાજયોગો ન સંશયઃ ॥ ૧૬॥

શુભે લગ્ને શુભે ત્વર્થે તૃતીયે પાપખેચરે ।
ચતુર્થે ચ શુભે પ્રાપ્તે રાજા વા તત્સમોઽપિ વા ॥ ૧૭॥

સ્વોચ્ચસ્થો હરિણાંકો વા જીવો વા શુક્ર એવ વા ।
બુધો વા ધનભાવસ્થઃ શ્રિયં દિશતિ દેહિનઃ ॥ ૧૮॥

ષષ્ઠેઽષ્ટમે તૃતીયે વા સ્વસ્વનીચગતા ગ્રહાઃ ।
લગ્નં પશ્યેત્ સ્વભોચ્ચસ્થો લગ્નપો રાજ્યયોગદઃ ॥ ૧૯॥

ષષ્ઠાઽષ્ટમવ્યયાધીશા નીચસ્થા રિપુભેઽસ્થગાઃ ।
સ્વોચ્ચસ્વભગલગ્નેશો લગ્નં પશ્યંશ્ચ રાજ્યદઃ ॥ ૨૦॥

સ્વોચ્ચસ્વભસ્થરાજ્યેશો લગ્નં પશ્યંશ્ચ રાજ્યદઃ ।
શુભાઃ કેન્દ્રસ્થિતા વાઽપિ રાજ્યદઃ નાઽત્ર સંશયઃ ॥ ૨૧॥

શુભરાશૌ શુભાંશે ચ કારકો ધનવાન્ ભવેત્ ।
તદંશકેન્દ્રેષુ શુભે નૂનં રાજા પ્રજાયતે ॥ ૨૨॥

લગ્નારૂઢં દારપદં મિથઃ કેન્દ્ર સ્થિતં યદિ ।
ત્રિલાભે વા ત્રિકોણે વા તદા રાજા ન સંશયઃ ॥ ૨૩॥

ભાવહોરાઘટીસંજ્ઞલગ્નાનિ ચ પ્રપશ્યતિ ।
સ્વોચ્ચગ્રહો રાજયોગો લગ્નદ્વયમથાપિ વા ॥ ૨૪॥

રાશેર્દ્રેષ્કાણતોંઽશાચ્ચ રાશેરંશાદથાપિ વા ।

યદ્વા રાશિદૃકાણાભ્યાં લગ્નદ્રષ્ટા તુ યોગદઃ ॥ ૨૫॥

પદે સ્વોચ્ચખગાક્રાન્તે ચન્દ્રાક્રાન્તે વિશેષતઃ ।
ક્રાન્તે ચ ગુરુશુક્રાભ્યાં કેનાપ્યુચ્ચગ્રહેણ વા ॥ ૨૬॥

દુષ્ટાર્ગલગ્રહાભાવે રાજયોગો ન સંશયઃ ।
શુભારૂઢે તત્ર ચન્દ્રે ધને દેવગુરૌ તથા ॥ ૨૭॥

દુઃસ્થાનેશોઽપિ નીચસ્થો યદિ લગ્નં પ્રપશ્યતિ ।
તદાઽપિ રાજયોગઃ સ્યાદિતિ જ્ઞેયં દ્વિજોત્તમ ॥ ૨૮॥

ચતુર્થદશમાર્થાયપતિદૃષ્ટે વિલગ્નભે ।
પદાલ્લાભે તુ શુક્રેણ દૃષ્ટેઽપ્યારૂઢભે શુભે ॥ ૨૯॥

રાજા વા તત્સમો વાપિ જાતકો જાયતે ધ્રુવમ્ ।
ષ।ષ્ઠાષ્ટમગતે નીચે લગ્નં પશ્યતિ વા તથા ॥ ૩૦॥

તૃતીયલાભગે નીચે લગ્નં પશ્યતિ વા તથા ।
લગ્નાંશકેન્દ્રેષુ શુભે નિગ્રહાનુગ્રહક્ષમઃ ॥ ૩૧॥

અથાઽહં સમ્પ્રવક્ષ્યામિ રાજયોગાદિકં પરમ્ ।
ગ્રહાણાં સ્થાનભેદેન દૃષ્ટિયોગવશાત્ ફલમ્ ॥ ૩૨॥

તપઃસ્થાનાધિપો મન્ત્રી મન્ત્રાધીશો વિશેષતઃ ।
ઉભાવન્યોન્યસંદૃષ્ટૌ જાતશ્ચેદિહ રાજ્યભાક્ ॥ ૩૩॥

યત્ર કુત્રાપિ સંયુક્તૌ તૌ વાપિ સમસપ્તમૌ ।
રાજવંશભવો બાલો રાજા ભવતિ નિશ્ચિતમ્ ॥ ૩૪॥

વાહનેશસ્તથા માને માનેશો વાહને સ્થિતઃ ।
બુદ્ધધર્માધિપાભ્યાં તુ દૃષ્ટશ્ચેદિહ રાજ્યભાક્ ॥ ૩૫॥

સુતકર્મસુહૃલ્લગ્નનાથા ધર્મપસંયુતાઃ ।
યસ્ય જન્મનિ ભૂપોઽસૌ કીર્ત્યા ખ્યાતો દિગન્તરે ॥ ૩૬॥

સુખકર્માદિપૌ વાપિ મન્ત્રિનાથેન સંયુતૌ ।
ધર્મનાથેન વા યુક્તૌ જાતશ્ચેદિહ રાજ્યભાક્ ॥ ૩૭॥

સુતેશે ધર્મનાથેન યુતે લગ્નેશ્વરેણ વા ।
લગ્ને સુખેઽથવા માને સ્થિતે જાતો નૃપો ભવેત્ ॥ ૩૮॥

ધર્મસ્થાને સ્થિતે જીવે સ્વગૃહે ભૃગુસંયુતે ।
પંચમાધિપયુક્તે વા જાતશ્ચેદિહ રાજભાક્ ॥ ૩૯॥

દિનાર્ધાચ્ચ નિશાર્ધાચ્ચ પરં સાર્ધદ્વિનાડિકા ।
શુભા વેલા તદુત્પન્નો રાજા સ્યાત્તત્સમોઽપિ વા ॥ ૪૦॥

ચન્દ્રઃ કવિં કવિશ્ચન્દ્રમન્યોઽન્યં ત્રિભવસ્થિતઃ ।
મિથઃ પશ્યતિ વા ક્વાપિ રાજયોગ ઉદાહૃતઃ ॥ ૪૧॥

ચન્દ્રે વર્ગોત્તમાંશસ્થે સબલે ચતુરાદિભિઃ ।
ગ્રહૈર્દૃષ્ટે ચ યો જાતઃ સ રાજા ભવતિ ધ્રુવમ્ ॥ ૪૨॥

ઉત્તમાંશગતે લગ્ને ચન્દ્રાન્યૈશ્ચતુરાદિભિઃ ।
ગ્રહૈર્દૃષ્ટેઽપિ યો જાતઃ સોઽપિ ભૂમિપતિર્ભવેત્ ॥ ૪૩॥

ત્ર્યલ્પૈરુચ્ચસ્થિતૈઃ ખેટે રાજા રાજકુલોદ્ભવઃ ।
અન્યવંશભવસ્તત્ર રાજતુલ્યો ધનૈર્યુતઃ ॥ ૪૪॥

ચતુર્ભિઃ પઞ્ચભિર્વાઽપિ ખેટૈઃ સ્વોચ્ચત્રિકોણગૈઃ ।
હીનવંશભવશ્ચાપિ રાજા ભવતિ નિશ્ચિતઃ ॥ ૪૫॥

ષડ્ભિરુચ્ચગતૈઃ ખેટૈશ્ચક્રવર્તિત્વમાપ્નુયાત્ ।
એવં બહુવિધા રાજયોગા જ્ઞેયા દ્વિજોત્તમ ॥ ૪૬॥

એકો ગુરુર્ભૃગુર્વાપિ બુધો વા સ્વોચ્ચસંસ્થિતઃ ।
શુભગ્રહયુતે કેન્દ્રે રાજા વા તત્સમો ભવેત્ ॥ ૪૭॥

કેન્દ્રેસ્થિતૈઃ શુભૈઃ સર્વૈઃ પાપૈશ્ચ ત્રિષડાયગૈઃ ।
હીનવંશોઽપિ યો જાતઃ સ રાજા ભવતિ ધ્રુવમ્ ॥ ૪૮॥

---

## અથ રાજસમ્બન્ધયોગાધ્યાયઃ ॥ ૪૦॥

રાજ્યનાથે જનુર્લગ્નાદમાત્યેશયુતેક્ષિતે ।
અમાત્યકારકેણાપિ પ્રધાનત્વં નૃપાલયે ॥ ૧॥

લાભેશવીક્ષિતે લાભે પાપદૃગ્યોગવર્જિતે ।
રાજ્યભાવે તદા વિપ્ર પ્રધાનત્વં નૃપાલયે ॥ ૨॥

અમાત્યકારકેણાપિ કારકેન્દ્રેણ સંયુતે ।
તીવ્રબુદ્ધિયુતો બાલો રાજમન્ત્રી ભવેદ્ ધ્રુવમ્ ॥ ૩॥

અમાત્યકારકે વિપ્ર સબલે શુભસંયુતે ।
સ્વક્ષેત્રેસ્વોચ્ચગે વાપિ રાજમન્ત્રી ભવેદ્ ધ્રુવમ્ ॥ ૪॥

અમાત્યકારકે લગ્ને પઞ્ચમે નવમેઽપિ વા ।
રાજમન્ત્રી ભવેદ્ બાલો વિખ્યાતો નાઽત્રસંશયઃ ॥ ૫॥

આત્મકારકતઃ કેન્દ્રે કોણે વાઽમાત્યકારકે ।
તદા રાજકૃપાયુક્તો જાતો રાજાશ્રિતઃ સુખી ॥ ૬॥

કારકાચ્ચ તથારૂઢાત્ લગ્નાચ્ચ દ્વિજસત્તમ ।
તૃતીયે ષષ્ઠભે પાપૈઃ સેનાધીશઃ પ્રજાયતે ॥ ૭॥

કારકે કેન્દ્રે કોણેષુ સ્વતુઙ્ગે વા સ્વભે સ્થિતે ।
ભાગ્યપેન યુતે દૃષ્ટે રાજમન્ત્રી ભવેદ્ ધ્રુવમ્ ॥ ૮॥

કારકે જન્મરાશીશે લગ્નગે શુભસંયુતે ।
મન્ત્રિત્વે મુખ્યયોગોઽયં વાર્ધકેનાઽત્ર સંશયઃ ॥ ૯॥

કારકે શુભસંયુક્તે પઞ્ચમે સપ્તમેઽપિ વા ।
દશમે નવમે વાઽપિ ધનં રાજાશ્રયાદ્ ભવેત્ ॥ ૧૦॥

ભાગ્યભાવપદે લગ્ને કારકે નવમેઽપિ વા ।
રાજસમ્બન્ધયોગોઽયં નિર્વિશંકં દ્વિજોત્તમ ॥ ૧૧॥

લાભેશે લાભભાવસ્થે પાપદૃષ્ટિવિવર્જિતે ।
કારકે શુભસંયુક્તે લાભસ્તસ્ય નૃપાલયાત્ ॥ ૧૨॥

લગ્નેશે રાજ્યભાવસ્થે રાજ્યેશે લગ્નસંસ્થિતે ।
પ્રબલો રાજસમ્બન્ધયોગોઽયં પરિકીર્તિતઃ ॥ ૧૩॥

કારકાત્ તુર્યભાવસ્થૌ સિતેન્દૂ દ્વિજસત્તમ ।
યસ્ય જન્મનિ જાતોઽયં રાજચિહ્નેન સંયુતઃ ॥ ૧૪॥

લગ્નેશે કારકે વાઽપિ પઞ્ચમેશેન સંયુતે ।
કેન્દ્રે કોણે સ્થિતે તસ્મિન્ રાજમિત્રં ભવેન્નરઃ ॥ ૧૫॥

Encoded and proofread by ajarve at fms30.cca.rockwell.com (Ahto Jarve)

*bRihatpArAsharahorAshAstramh 31-40*

pdf was typeset on January 14, 2022

Please send corrections to *sanskrit@cheerful.com*